# संस्कृतवार्ता:

दिनाङ्क : 14/08/2025 सायम् - 06:20

**आदौ-मुख्यवार्ता:**

· अद्य भारतं पाकिस्तानस्य नेतृत्वस्य अविवेकी, युद्धोन्मादस्य, द्वेषपूर्णस्य च टिप्पणीं प्रति प्रहारं कृतवान् अवदत् यत्, कस्यापि दुस्साहसेत्यस्य वेदनादायकाः परिणामाः भविष्यन्ति इति ।

· स्वतन्त्रतादिवसस्य अवसरे नवत्यधिकैकसहस्र आरक्षि, अग्निशामक, गृह, नागरिक, सुरक्षा सुधारकसेवानां च कर्मचारिणः शौर्य-सेवा-पदकैः पुरस्कृताः।

· राष्ट्रपतिपदासीना द्रौपदीमुर्मू: अद्य एकोनाशीतितमस्य स्वतन्त्रतादिवसस्य पूर्वसन्धायां राष्ट्रम् सम्बोधयिष्यति।

· सर्वोच्चन्यायालयेन दिल्ली-राष्ट्रिय-राजधानी-क्षेत्रे वङ्क-कुक्कुरैः सम्बद्ध निर्देशान् स्थगयितुं याचनायाः विषये आदेशः रक्षितः, पूर्व निर्देशस्य स्थगनम् अपि न कृतम्।

· भारत-ऋतुविज्ञान-विभागेन देशस्य उत्तरभागेषु पूर्वभागेषु च अति-प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति।

**अथ वार्ताः विस्तरेण**

**विदेशमंत्रालय-पाकिस्तानः**

अद्य भारतं पाकिस्तानस्य नेतृत्वस्य अविवेकी, युद्धोन्मादस्य, द्वेषपूर्णस्य च टिप्पणीं प्रति प्रहारं कृत्वा अवदत् यत्, सद्य एव यथा प्रदर्शितम् अस्ति तदनुसारं कस्यापि दुस्साहसेत्यस्य वेदनादायकाः परिणामाः भविष्यन्ति इति। अद्य अपराह्णे नवदिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जायसवालः अवदत् यत्, पाकिस्तानस्य भाषणं नियंत्रयितुं सम्यक् परामर्शः प्रदीयते इति।

**आरक्षि-पुरस्कार:**

स्वतन्त्रतादिवसस्य अवसरे नवत्यधिकैकसहस्र आरक्षि, अग्निशामक, गृह, नागरिक, सुरक्षा सुधारकसेवानां च कर्मचारिणः शौर्य-सेवा-पदकैः पुरस्कृताः। गृहमन्त्रालयेन उक्तं यत्, त्रयस्त्रिंशोत्तरद्विशत कर्मचारिणः शौर्य-पदकेन, नवनवति कर्मचारिणः विशिष्टसेवायाः कृते राष्ट्रपति-पदकेन, अष्टपञ्चाशदधिक सप्तशतं यावत् कर्मचारिणः प्रशंसनीयसेवायाः पदकेन च पुरस्कृताः सन्ति।

**राष्ट्रपति-अभिभाषण:**

राष्ट्रपतिपदासीना द्रौपदीमुर्मू: अद्य एकोनाशीतितमस्य स्वतन्त्रतादिवसस्य पूर्वसन्धायां राष्ट्रम् सम्बोधयिष्यति। राष्ट्रपते: सम्बोधनम् आकाशवाण्या: सम्पूर्णेषु राष्ट्रिय अन्तर्जालपटलेषु सायं सप्तवादनत: प्रसारयिष्यते। तत्रैव, सम्बोधनममिदम् दूरदर्शनस्य सर्वासु वाहिनीषु हिन्दीभाषायां तदनन्तरम् आंग्लभाषायामपि प्रसारयिष्यते। दूरदर्शने हिन्दी-आंग्ल-भाषयो: सम्बोधनस्य प्रसारणानन्तरं दूरदर्शनस्य क्षेत्रीय-वाहिन्य: अपि क्षेत्रीभाषासु एतस्य प्रसारणं करिष्यन्ति। आकाशवाण्या: अपि सम्बन्धित-क्षेत्रीय-अन्तर्जाले रात्रौ सार्धनववादने क्षेत्रीय -भाषासु राष्ट्रपतिसम्बोधनं प्रसारयिष्यते।

अमृत-उद्यान

राष्ट्रपति: द्रौपदी मुर्मू: अस्मै वर्षाय ग्रीष्मकालिक-अमृतोद्यानस्य उद्घाटनं राष्ट्रपति-भवने कृतवती। उद्यानमिदं जनसामान्येभ्य: शनिवासरात् सितम्बरमासस्य चतुर्दशदिनांकपर्यन्तं उद्घाटितं भविष्यति। अत्र बालानां मनोरञ्जनाय विभिन्नानि उपकरणान्यपि स्थापितानि सन्ति। एकोनत्रिंशदगस्ते राष्ट्रियक्रीडादिवसावसरे अमृतोद्यानम् विशेषत: क्रीडकेभ्य:, बालेभ्य: विद्यालयीयशिक्षकेभ्यश्च उद्घाटितं स्थास्यति। अमृतोद्याने प्रवेशं पूर्णरूपेण निःशुल्कः भविष्यति। जनाः अन्तर्जालीयपटल visit.rashtrapatibhawan.gov.in इत्यनेन माध्यमेन अपि प्रवेशचिटिकाः प्राप्तुं शक्नुवन्ति। इदम् उद्यानं सोमवासरे पिहितं स्थास्यति।

प्रधानमन्त्री-स्वतन्त्रतादिवस

श्वः राष्ट्रम् एकोनाशीतितमं स्वतन्त्रतादिवसं आमानयति। प्रधानमन्त्री नरेन्द्रमोदी शुभावसरेऽस्मिन् दिल्ल्या: लालकिलास्थलात् देशस्य समग्रस्य नेतृत्वं विधास्यति अपि च राष्ट्रं सम्बोधयिष्यति। गतवर्षस्य स्वतन्त्रतादिवस्य विषयो आसीत्- विकसितभारतं सप्तचत्वारिंशदधिकद्विसहस्रतमं इति। ऐषमः वर्षस्य स्वतन्त्रतादिवस्य विषयो वर्तते- नूतनभारतं ।

एषः समारोहः समृद्धस्य, सुरक्षितस्य, शौर्यस्य च नूतनभारतस्य निरन्तरोत्थानस्य स्मरणार्थं मञ्चरूपेण कार्यं करिष्यति तथा च प्रगति-पथे अग्रेप्रवर्धनाय नवीनोर्जाः प्रदास्यति। अस्मिन् वर्षे स्वातन्त्र्यदिवसस्य उत्सवस्य समये ऑपरेशन सिन्दूर इत्यस्य सफलतायाः उत्सवः भविष्यति। आमन्त्रणपत्रेषु ऑपरेशन सिण्दूर् इत्यस्य अभियानस्य चित्रं, तथैव चिनाबसेतोः चिह्नं च अङ्कितम् अस्ति । अस्मिन् वर्षे लालदुर्गे उत्सवस्य साक्षिणः भवितुम् विभिन्नवर्गेभ्यः पञ्चसहस्राणि विशेषातिथयः आमन्त्रिताः सन्ति। सेना, नौसेना, वायुसेना, भारतीयतटरक्षक, एनसीसी, सीआरपीएफ, आईटीबीपी, सीआईएसएफ, एसएसबी, बीएसएफ, आईडीएस, आरपीएफ, असम राइफल्स् इत्येतैः बलैः देशस्य चत्वारिंशदधिकैकशत तोप्यधिकेषु प्रमुखेषु स्थानेषु वाद्य प्रदर्शनं भविष्यति।

किश्तवार-मेघस्फ़ोट

अद्य जम्मु-कश्मीरस्य किश्तवार-जनपदे पड्डुर-क्षेत्रे चशोति ग्रामे मेघस्फ़ोटस्य घटना संजाता यस्मिन् दश-जनानां मृत्योः आशंका अस्ति। राष्ट्रपति द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्र मोदी, उपराज्यपाल मनोज सिन्हा, मुख्यमन्त्री ओमर-अब्दुल्ला च घटनायां स्वसंवेदनाः प्रकटितवन्तः ।

## विशेष-अतिथि-स्वतन्त्रता दिवसः

अल्पसङ्ख्यकप्रकरणमन्त्री किरेन रिजिजुः अद्य अवदत् यत् श्वः लालकिलास्थाने स्वातन्त्र्यसमारोहे पि. एम्. विकास्-योजनायाः अन्तर्गतं प्रशिक्षिताः सिख्-यूनः विशिष्टातिथिरूपेण कार्यक्रमे भागं गृहिष्यन्ति। नवदेहली-नगरे एतेषां विशेष-अतिथिभिः सह संवाद-कार्यक्रमे मन्त्रिणः स्वस्य भाषणे एतत् उक्तवान्। सः अवदत् यत् एते युवकाः उद्यम-संरेखित-कार्यभूमिकासु प्रशिक्षिताः भवन्ति यानि उद्यमोन्मुख-कार्यबलस्य आवश्यकतां पूरयन्ति। सः अवदत् यत् प्रथमवारं मन्त्रालयः एतान् यूनः स्वातन्त्र्यदिवसस्य समारोहे विशेषातिथिरूपेण प्रेषयति। श्री रिजिजुः दिल्ली-सिक्ख्-गुरुद्वारा-व्यवस्थापनसमितेः एकत्रिंशत्सहस्रात् अधिकानां यूनां प्रशिक्षणस्य प्रशंसनीयकार्यस्य कृते अपि अभिनन्दनं कृतवान्।

## सर्वोच्चन्यायालय

सर्वोच्चन्यायालयेन अद्य दिल्ली-राष्ट्रिय-राजधानी-क्षेत्रे वङ्क-कुक्कुरान् आश्रयगृहान् प्रति निष्कासयितुं अगस्तमासस्य एकादश-दिनाङ्के द्विसदस्यपीठेन दत्तान् निर्देशान् स्थगयितुं याचनायाः विषये आदेशः रक्षितः। परन्तु त्रयन्यायाधीशयुतं न्यायपीठं नगरपालिकाधिकारिभ्यः निर्दिशितेषु निर्देशेषु स्थगनं न दत्तवन्तः। न्यायाधीशः विक्रम नाथः, न्यायाधीशः सन्दीप मेहता, न्यायाधीशः एन्. वी. अञ्जारिया इत्येतैः युक्तः खण्डपीठः प्रकरणस्य श्रवणम् अकरोत्, यदा न्यायाधीशः जे. बी. पारदीवाला, न्यायाधीशः आर्. महादेवन् इत्येतैः युक्तः द्विसदस्यपीठः सर्वान् वङ्क-कुक्कुरेभ्यः निष्कासनं कृत्वा तान् आश्रयस्थानेषु स्थानान्तरयितुं स्वप्रेरणया आदेशं स्वीकृतवान्। भारतस्य मुख्यन्यायाधीशेन समक्षं केचन अधिवक्तारः पूर्वनिदेशाः अन्यैः न्यायपीठैः दत्तैः पूर्वनिदेशैः सह विक्षुब्धाः इति उक्तवन्तः, ततः परं अयं निर्णयः अभवत्।

## ईसी-विशेष-गहन-संशोधनः

भारतस्य निर्वाचन-आयोगः अद्य अवदत् यत् बिहार-राज्ये विशेष-गहन-संशोधनस्य अभ्यासस्य विषये अभियोग-आक्षेप-कालस्य 14 दिवसाणाम् अनन्तरम्, अद्यपर्यन्तं कस्यापि राजनैतिकदलस्य एकमपि अभियोगं वा आक्षेपं वा न दत्तम् इति। परन्तु, आयोगः अवदत् यत् ड्राफ्ट्-मतदातापंजी इत्यस्य विषये निर्वाचकेभ्यः प्रत्यक्षतया सार्धत्रिविंशतिसहस्राधिक-सप्तपञ्चाशत-संख्यकाः अभियोगाः आपत्तयः च प्राप्ताः इति।

## ट्रम्प्-पुतिन्ः

यूरोपीयनेतृभिः अमेरिकादेशस्य राष्ट्रपतिना डोणाल्ड् ट्रम्प् इत्यस्मै अलास्का-नगरे शुक्रवासरे रशियादेशस्य राष्ट्रपतिना व्लादिमिर् पुतिन् इत्यनेन सह एकपक्षीयं युक्रेन्-शान्तिसन्धिं न कर्तुं प्रार्थितम्। जर्मन्-चान्सलर् फ्रेडरिक् मेर्ज़् इत्यनेन आहूतस्य आभासीय-शिखरसम्मेलने एषा पूर्वसूचना दत्ता, यस्मिन् अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्प्, युक्रेन्-देशस्य राष्ट्रपतिः वोलोदिमिर् ज़ेलेन्स्की, अनेकाः यूरोपीयनेतारः च आसन्। आभासीय-संवादस्य अनन्तरं, यत् ट्रम्प्-वर्यः अत्यन्तं

उत्तमम् इति वर्णितवान्, सः नेतॄन् आश्वासितवान् यत् शिखरसम्मेलनेन अनन्तरं सः तत्क्षणमेव तेभ्यः परिणामस्य विषये सूचयिष्यति इति।

**<u>ऋतुविज्ञान-विभागः</u>**

भारत-ऋतुविज्ञान-विभागेन देशस्य उत्तरभागेषु पूर्वभागेषु च अति-प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। अद्य उत्तराखण्ड्, जम्मू-कश्मीर्, पञ्जाब्, दिल्ली, हरियाणा, चण्डीगढ, तटीय-आन्ध्र-प्रदेश, ओडिशा इत्येतेषु पृथक्-पृथक् स्थानेषुअतिप्रचण्डवृष्टेः पूर्वानुमानम् अस्ति। अत्रान्तरे, दिल्ली-राष्ट्रिय-राजधानी-क्षेत्रे प्रातःकालात् निरन्तरं वृष्टिः भवति, यत्र प्रचण्डवृष्टेः पूर्वानुमानमपि अस्ति।

**पञ्जाब-जलस्तरः**देशस्य उत्तरपूर्वभागेषु च प्रचण्डः मानसूनवृष्टिः विनाशं जनयति, बिहारस्य, पञ्जाबराज्यस्य, हिमाचलप्रदेशस्य च नद्यः जलज्वारयुताः सन्ति, येन विस्तृतः जलप्लावनं जायते। हिमाचलस्य पर्वतेषु निरन्तरं वृष्टिः, राज्यस्य केषुचित् भागेषु मेघस्फोटानां घटनाः च व्यास-नद्याः जलस्तरस्य वृद्धेः कारणात् पञ्जाब्-राज्यस्य केषुचित् भागेषु समस्यां जनयितुं आरभन्त।

**।। इति वार्ता: ।।**